# प्रथमोऽध्याय:

## प्रस्तावना

सम्प्रति विश्वेऽस्मिन् विकशितेषु प्रायश: सर्वेषु शास्त्रेषु गूढरूपेण वैदिकनिदर्शनं विद्यते। यतो वेद: सकलशास्त्रस्य साररूप इति उच्यते। मानवसभ्यताया: आदिमेतिहासस्याध्येतार: वेदादेव तथ्यग्रहणपूर्वकं वैज्ञानिकव्याख्यां प्रस्तुवन्ति। अत: अस्य महत्वं कीर्तिश्च जगति प्रसिद्धा विद्यते। वेदादिशास्त्रमाधारीकृत्य बहव: विद्वांस: धार्मिक-दार्शनिक-सामाजिक-भाषिक-वैज्ञानिकादिशास्त्रेषु बहून् ग्रन्थान् विरचितवन्त:। तथापि तस्य ज्ञानस्य सम्पूर्णोपलब्धिं कर्तुं नैव केनापि शक्यते। अतएव सायणादिभाष्यकारा: तं शास्त्रमपौरुषेयत्वेन नित्यत्वेन च गृह्णन्ति।

वैदिकशास्त्रेषु विविधदेवतानामृषीणामादर्शकार्यप्रवृत्तानां च यशोगानं प्रशंसकैर्वर्णितं विद्यते। तद् शास्त्रे वर्णितानां ज्ञानानामनुसरणेन मानवजातेर्निरापदमभ्युन्नतिश्च संभवति। इदं शास्त्रमाचारशास्त्रस्य संविधानम्, इहलौकिकाभ्युदयस्य मूलकारणं तथा पारलौकिकपुण्यार्जनार्थं च तस्याध्ययनं परमफलदायकमिति वर्णितमस्ति। अत: मनुना "सर्वोऽभिहितोवेदे सर्वज्ञानमयो हि स"[१] इत्युक्त्वा सकलशास्त्राणां निधिरूपा वेदविद्या स्तुता।

**को वा वेद:?**

विद् धातो: घञ्-प्रत्ययस्य संयोगेन वेद इति शब्द: निष्पन्न:। य: मूलत: ज्ञानमिति अर्थं व्यनक्ति। किन्तु सिद्धान्तकौमुद्यां विद् धातो: चतुर्प्रकारका: अर्था: प्राप्यन्ते -

सत्तायां विद्यते ज्ञाने वेति विन्ते विचारणे

विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्॥[२]

एवमेव विद् ज्ञानेविचारणे, विद्लृ लाभे, सत्तायां चार्थे विद्-धातो: प्रयोग: परिलक्ष्यते। ऋग्वेदभाष्यभूमिकायां स्वामिदयानन्देन "विन्दन्ति जानन्ति विद्यते भवन्ति, विन्दन्ति अथवा विन्दन्ते लभन्ते, विन्दन्ति विचारयन्ति सर्वे मनुष्या: सद्विद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदा:"[३] इत्युक्त्वा पूर्वोक्तेषु चतुर्ष्वेवार्थेषु विद् धातो: ग्रहणं वर्णितम्। भाष्यकारसायणाचार्योऽपि

वेदस्य परिभाषामेव विवृणोति "बोध्यते प्राप्यते वा धर्मादिपुरुषार्थो अनेनेति व्युत्पत्त्या पुरुषार्थबोधक: मन्त्रब्राह्मणोभागात्मक: शब्दराशि: वेद:"[४] इति। पुनश्च तेनोक्तम् - "इष्टप्राप्त्यनिष्टपरिहारयो: अलौकिकमुपायं यो ग्रन्थो वेदयति स: वेद:"[५] इति। अन्यत्र कुत्रचित् "मन्त्रब्राह्मणयोर्वेदनामधेयम्"[६] इति परिभाषायां ज्ञानातिरिक्तार्थे[७] च परिदृश्यते वेदशब्दस्य प्रयोग:। वेद इति पदस्य व्याख्यायां यजुर्वेदे प्राप्यते " वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूम्या:"।[८] अस्य वेदमन्त्रस्य व्याख्यायां महीधरेण[९] ऋग्वेदादिस्वरूपं ज्ञानदायकं शास्त्रं वेदत्वेनोपस्थापितम्। तस्यैव मन्त्रस्य व्याख्यायां दयानन्देन "वेत्ति चराचरं जगत् स: जगदीश्वर: विन्दन्ति येन स ऋग्वेदादिर्वा"[१०] इत्युक्त्वा चराचरजगत: ज्ञानप्रदातृरूपेण ऋग्वेदादिशास्त्रं वेदत्वेनोल्लेखितम्।

अस्माकं शोधकार्यं यद्यपि वैदिकसंहितानामुपरि आधारितं विद्यते तथापि संहिताविभागोऽयं सामूहिकरूपेण विशालवैदिकसाहित्यान्तर्गतत्वादत्र लघुरूपेण विशालवैदिकसाहित्यस्योपस्थापनं क्रियते। वस्तुत: वैदिकसाहित्यमित्यनेन वेदचतुष्टयं तथा तेषां भिन्ना: भिन्ना: ब्राह्मणारण्यकोपनिषत्प्रातिशाख्यग्रन्था: सूत्रग्रन्थाश्च अन्तर्भुक्ता: भवन्ति। विभाजनमिदं प्रत्येकस्य प्रतिपाद्यविषयानुसारेण कृतं विद्यते।

**संहिता -** 'संहिता'इति शब्दस्य व्याख्यायां यास्काचार्येण निगदितं "पदप्रकृति: संहिता"।[११] विद्वद्भि: अस्य निर्वचनस्य अर्थद्वयं व्याख्यायते- (क) पदानां संघीयमानानां प्रकृति: संहिता। (ख) पदान्येव प्रकृतिर्यस्या: सा संहिता। इत्यत्र वहुब्रीहितत्पुरुषयो: द्वयो: समासे 'पद' 'संहिता'उभयं पदप्रकृतित्वेनोपस्थाप्यते।[१२]"संहन्यन्ते एकत्रीक्रियन्ते मन्त्रा: सूक्तानि वा अस्यां सा संहिता" [१३]अस्या व्युत्पत्या: विविधद्रष्टृद्वारा संरचितानां मन्त्राणामेकत्र संगृहीतं संहितेति अर्थ: निगद्यते। अत: संहिता मन्त्रसंकलनमित्यपि[१४] उच्यते। वस्तुत: छन्दोबद्धमन्त्रस्वरूपो वैदिकदेवतास्तुतिपरको वैदिकमहर्षिभि: साक्षात्कृतो मुख्योविभाग: संहिताशब्देन व्यपदिश्यते। यज्ञकर्मणि ऋत्विजां कार्ये वेदमन्त्राणामुपयोगं विधातुमिदं मन्त्रसंहितानां संकलनम्।

ऋक् यजु सामाथर्वाख्यान् वेदान् पूर्वादिभिमुखै:

शास्त्रमिज्या स्तुतिस्तोमं प्रायश्चितं व्यधात् क्रमात्॥[१५]

संकलनमिदं स्वयं वेदव्यासेन[१६] कृतम् इत्युच्यते। वेदानां विभाजनत्वात् तस्य वेदव्यास: इति संज्ञा। संहिता मूलत: चतु: प्रकारका: वर्ण्यन्ते - ऋक्संहिता, यजुस्संहिता, सामसंहिता अथर्वसंहिताश्च। जैमिनिसूत्रे[१७] छन्दोबद्धमन्त्रम् ऋक्, गायनमन्त्रं साम तदतिरिक्तमवशिष्टं वा मन्त्रं यजुर्वेदत्वेन स्वीकृतम्। अधुना प्रत्येकसंहितानां किञ्चित् विस्तारपूर्वकमालोचनात्र प्रस्तूयते।

**ऋक्संहिता-** "ऋच्यन्ते स्तूयन्ते देवा अनया इति ऋक्"[१८] अनया व्युत्पत्या स्तुतिपरकानां यज्ञपूजादिसम्पादकानां छन्दोबद्धमन्त्राणां ऋक् इति संज्ञा। विविधसमये विविधमन्त्रद्रष्टृभि: ऋषिभि: संरचितानाम् ऋचां संकलनं ऋक्संहिता इत्यनेन ज्ञायते। चतु: संहितासु सर्वप्राचीनं सर्ववृहत् ज्ञानराशिर्विद्यते ऋक्संहिता। विन्टरनिज् महाभागस्य भाषायां[१९]"भारतीयधर्मस्य (संस्कृतेर्वा) प्रारम्भिकविकाशविषये ज्ञातार्थं ऋक्सूक्तादधिकमूल्यवत्तथ्यं जगति नोपलभ्यते"। ऋक्संहिताया: विभाजनं मण्डलाष्टकक्रमौ च प्राप्येते। अष्टकक्रमे अष्टाध्यायात्मका: अष्टाष्टका: षडधिकद्विसहस्रसंख्यका: वर्गाश्च समुपलभ्यन्ते। तत्रस्थानां चतुषष्ठिसंख्यकानामध्यायानां पाठसौकर्यार्थं कृतं वर्गेषु विभाजनम्। साधारणत: एकस्मिन् वर्गे पञ्चऋच: भवन्ति, किन्तु कुत्रचित् एकादारभ्य: नवसंख्यका: ऋच: उपलब्धा:।

मण्डलक्रमस्य स्रष्टा महर्षि: शाकल इति उक्तम्[२०]। मण्डलक्रमे दशमण्डलानि, पञ्चाशीत्यनुवाक्यानि सप्तदशाधिकान्येकसहस्रसंख्यकानि सूक्तानि च प्राप्यन्ते। एकादशसंख्यकानां वालखिल्यसूक्तानां संयोगेन अष्टाविंशत्यधिकान्येकसहस्रसंख्यकान्युपलभ्यन्ते। मन्त्रसंख्याविषये मतवैभिन्यमस्ति। शौनकस्यानुक्रमण्यां १०५२८ संख्यका: मन्त्रा: उपदिष्टा:।

ऋचां दशसहस्राणि ऋचां पञ्चशतानि च

ऋचामशीति पादश्च पारणं सम्प्रकीर्तितम्॥[२१]

पुनश्च शाकल्यमतानुसारेण १०५८० संख्यका: मन्त्रा: निर्दिष्टा:।[२२] ऋक्संहिताया: मन्त्रे एकस्मिन् सर्वमाहत्य मन्त्रसंख्या: १५००० इत्युक्तम्।[२३] वस्तुत: ऋग्वेदस्य प्रणयनकाले तावत्येव मन्त्रसंख्या भवितुमर्हति, कालान्तरे कालस्य कुटिलगत्यां किञ्चित् विलुप्तं जातम्। अत: सम्प्रति १०५८० संख्यका: मन्त्रा: समुपलभ्यन्ते। पूज्यश्रीपाद दामोदरसातवलेकरसायणाचार्ययो: टीकयोरुपरि आधारितस्य सत्यवीरशास्त्रीमहाभागेन सम्पादितस्य डी पी वी पाब्लिकेशन्स द्वारा प्रकाशितस्य ऋग्वेदस्य नवीनसंस्करणानुसारेण प्रत्येकमण्डले प्राप्तानां सूक्तमन्त्रसंख्यानाञ्च सूक्ष्मा सूची[२४]अत्र उपस्थाप्यते -

| मण्डलम् | सूक्तसंख्या | ऋकसंख्या |
|---|---|---|
| प्रथममण्डलम् | १९१ | २००६ |
| द्वितीयमण्डलम् | ४३ | ४२९ |
| तृतीयमण्डलम् | ६२ | ६१७ |
| चतुर्थमण्डलम् | ५८ | ५८९ |
| पञ्चममण्डलम् | ८७ | ७२७ |
| षष्ठमण्डलम् | ७५ | ७६५ |
| सप्तममण्डलम् | १०४ | ८४९ |
| अष्टममण्डलम् | ९२ | १६३६ |
| नवममण्डलम् | ११४ | ११०८ |
| दशममण्डलम् | १९१ | १७५४ |

**यजु:संहिता-** "अनियताक्षरवसानो यजु:" अर्थात् अक्षराणि अनिश्चितानि सन्ति यत्र तद्यजु: इति। गद्यरूपेण संरचिता ऋक-सामभिन्ना रचना 'यजु:'इत्यनेन प्रोच्यते।[२५] किन्तु यजुर्वेदे प्राप्तानां छन्दोबद्धमन्त्राणां ऋक्[२६] इत्येव संज्ञा स्यात्। यजुषां संग्रह: यजुर्वेद:। शतपथब्राह्मणे युज् धातो: यजुष् इति पदस्य निर्वचनं वर्णितम्।[२७] निरुक्तकारेणापि "यजुर्यजते: यज्ञेन संबद्धा मन्त्रा यजूंषि भवन्ति"[२८] इत्यनेन निर्वचनेन यज्ञकार्यसम्पादकानां मन्त्राणां संकलनं यजुर्वेद: इत्युक्तम्। तथैव अथर्ववेदे[२९] गोपथब्राह्मणे वैतानसूक्ते[३०] च अस्य वेदस्य साक्षात् सम्बन्धोयज्ञेन साकं प्राप्यते इति उक्तम्।

मुख्यरूपेण यजुर्वेद: कृष्णशुक्लत्वेन द्विधा विभाजितो विद्यते। केवलं छन्दोबद्धमन्त्राणां संकलनं शुक्लत्वेन तथा गद्यात्मकानां ब्राह्मणभागानामपि मिश्रणेन तद्वेद कृष्णयजुर्वेदत्वेन प्रसिद्धो वर्तते। शुक्लयजुर्वेदस्य द्वौ मुख्यविभागौ स्त: काण्व वाजसनेयी च। काण्वसंहितायां चत्वारिंशदध्याया: अष्टाविंशत्यधिकत्रिशतानुवाका: षष्ठाशीत्यधिकद्विसहस्रसंख्यका: मन्त्राश्चोपलभ्यन्ते। वाजसनेयीसंहितायामपि चत्वारिंशदध्याया: पञ्चसप्तत्यधिकषोडशशतका: मन्त्रा: प्राप्यन्ते। उभयो: संहितयो: अध्यायसंख्यास्तु समाना: किन्तु मन्त्रसंख्यायां भिन्नता परिदृश्यते। इत्यत्र उभयो: संहितयो: अध्यायानुसारेण विभाजितानां मन्त्रसंख्यानां एका सूची उपस्थाप्यते-

| अध्याय: | मन्त्रसंख्या | | अध्याय: | मन्त्रसंख्या | | अध्याय: | मन्त्रसंख्या | | अध्याय: | मन्त्रसंख्या | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | वाज. | काण्व. | | वाज. | काण्व. | | वाज. | काण्व. | | वाज. | काण्व. |
| १ | ३१ | ५० | १२ | ११७ | ८५ | २३ | ६५ | ६० | ३४ | ५८ | २३ |
| २ | ३४ | ६० | १३ | ५८ | ११६ | २४ | ४० | ४७ | ३५ | २२ | ५५ |
| ३ | ३६ | ७६ | १४ | ३१ | ६५ | २५ | ४७ | ६७ | ३६ | २४ | २४ |
| ४ | ३७ | ८६ | १५ | ६५ | ३५ | २६ | २६ | ४४ | ३७ | २१ | २० |
| ५ | ४३ | ५५ | १६ | ६५ | ८५ | २७ | ४५ | ४५ | ३८ | २८ | २७ |
| ६ | ३७ | ५० | १७ | ९९ | ६४ | २८ | ४६ | १४ | ३९ | १३ | १७ |
| ७ | ४८ | ४० | १८ | ७७ | ८६ | २९ | ६० | ५० | ४० | १८ | १८ |
| ८ | ६३ | ३२ | १९ | ९५ | ४३ | ३० | २२ | ४६ | | | |
| ९ | ४० | ४६ | २० | ९० | ४६ | ३१ | २२ | ५१ | | | |
| १० | ३४ | ४३ | २१ | ६१ | १०६ | ३२ | १६ | ५४ | | | |
| ११ | ८३ | ४७ | २२ | ३४ | ७५ | ३३ | ९७ | ४६ | | | |

एवमेव गद्यपद्यात्मकस्य कृष्णयजुर्वेदस्यापि चत्वार: संहिताग्रन्था: उपलभ्यन्ते- तैत्तिरीय-मैत्रायणी-कठ-कपिष्ठलश्चेति। एतेषु तैत्तिरीयसंहितामेव प्राचीनतमं मन्यते। अस्यां संहितायां सप्तकाण्डा: चतुश्चत्वारिंशत् प्रपाठका: २१९८ संख्यका: कण्डिकाश्च (मन्त्राश्च) उपलभ्यन्ते। मैत्रायणीसंहितायां चत्वारकाण्डा: ३१४४ संख्यका: मन्त्रा:, कठसंहितायां पञ्चखण्डा: १८०० संख्यका: मन्त्रब्राह्मणाश्च उपलभ्यन्ते। कपिष्ठलसंहिताया: पाण्डुलिपिस्तु काश्यां "सरस्वतीभवनम्" इति पाण्डुलिप्यागारे खण्डितावस्थायां संप्राप्तम्। तस्य पाठोद्धारादनन्तरं संशोधका:[३१] अष्टकादौ तस्या: संहिताया: विभाजनमासीदिति उपवर्णीतम्।

**सामसंहिता-** "गीतिषु सामाख्या:"[३२] इति जैमिनि: सूत्रयामास। गीत्यात्मका: मन्त्रा: सामसंज्ञका: भवन्ति। बृहदारण्यकोपनिषदि[३३] सामशब्दस्य व्याख्या प्राप्यते "सा च अमश्चेति तत् साम्न: सामत्वम्"। इत्यत्र 'सा' पदेन ऋक् इति सूचितम्। अमोस्तु स्वरसंज्ञार्थक: अर्थात् ऋक्-मन्त्रेषु स्वराणांसन्निवेषेण यद्रूपं जायते तदेव यजुत्वम्। स्वरपूर्णो ऋक्-मन्त्रमेव यजुत्वेन

ज्ञातव्यमिति व्याख्या। वैदिकसंहितायां ऋक्-सामौ एकत्रं 'दम्पति:'[३४] इत्युक्तम्। ऋक्संहितायां जागृतजन: सामज्ञाता भवितुं शक्नोतीति उक्तम्।[३५] अथर्ववेदे परब्रह्मण अस्योत्पत्ति:[३६] तथा ब्रह्मणो लोमरूपेण[३७] च वर्णितं सामम्।

सामवेदस्य पूर्वार्चिकोत्तरार्चिक: इति संज्ञकौ द्वौ आर्चिकौ (विभागौ) स्त:। आर्चिकस्तु ऋचां समूह:। सामवेदे सर्वमाहत्य १८७५ संख्यका: मन्त्रा: संप्राप्यन्ते यत्र केवलं नवनवति-संख्यका: मन्त्रा: मौलिका:। अन्यास्तु ऋग्वेदादुद्धृता: । पूर्वार्चिके षडध्याया: पञ्चदशाधिकषट्शतसंख्यका: मन्त्रा: तथा उत्तरार्चिके एकविंशति संख्यका: अध्याया: पञ्चविंशत्युत्तरद्वादशशतमन्त्रा: सन्ति। सर्वमाहत्य सामवेदे पञ्चसप्तत्युत्तर-अष्टादशशतसंख्यका: मन्त्रा: निगदिता।

**अथर्वसंहिता-**वैदिकसंहितासु अन्तिमे सोपाने विद्यतेऽथर्वसंहिता। अथर्वनामक: महर्षि: अस्या: संहिताया: द्रष्टा इत्युच्यते। निरुक्तकार: अथर्वस्य निर्वचनं प्रस्तूयन्नाह- "अथर्वाणोऽथर्वणवन्तस्थर्वतश्चरति कर्मा तत्प्रतिषेध:"[३८] अर्थात् गत्यर्थक: थर्वधातौ नञर्थक: अकारस्य संयोगेन गतिहीननिश्चलेति अर्थं प्रकटयति। गोपथेब्राह्मणे[३९] निश्चलबुद्धिवृत्या: व्यक्तिविशेषं अथर्वा इति प्रोक्तवन्त:। पाश्चात्यविद्वद्धि: सम्यक्कार्याणां प्रतिपादकत्वेन अथर्वस्य प्रयोगं वर्णितम्।[४०] भाष्यकार: सायणाचार्य: इतरेभ्य: त्रिभ्य: अथर्ववेदं श्रेष्ठतरं मन्यते यत्र पारलौकिकविषयाणां वर्णनेनसह लौकिकविषयाणामपि समान्तरालव्याख्या प्राप्यते -

"व्याख्याय वेदत्रितयम् आमुष्मिकफलप्रदम्

ऐहिकमामुष्मिकफलं चतुर्थं व्याचिकीर्षति"॥[४१]

अस्या: संहिताया: मुख्यासु नवसंख्यकासु शाखासु शौनकसंहिता प्रतिनिधिरूपा वर्तते। तत्र विंशतिसंख्यकानि काण्डानि, त्रिशदधिकसप्तशतानि सूक्तानि सप्ताशीत्युत्तरनवशताधिकपञ्चसहस्रसंख्यका:(५९८७) मन्त्रा: समुपलभ्यन्ते।

**ब्राह्मणम्-** ब्राह्मणमिति शब्दस्य निष्पत्तिः ब्रह्मन्शब्देन सह[४२] तद्धितार्थकः अण्[४३] प्रत्ययसंयोगेन भवति। ग्रन्थवाचकः ब्राह्मणशब्दस्य प्रयोगः महाभारतमतिरिच्य[४४] सर्वत्र नपुंसकलिङ्गे एव प्रयुक्तं दरीदृश्यते।[४५] अस्य ब्राह्मणशब्दस्य व्याख्यायां भिन्नाः भिन्नाः पण्डिताः भिन्नाभिमतमदर्शयन्। सायणानुसारेण मन्त्रभिन्ना रचना एव ब्राह्मणमित्युक्तम्।[४६]बौधायनधर्मसूत्रे 'वाक्'ब्रह्मत्वेनोपवर्णितमस्ति।[४७] तैत्तिरीयब्राह्मणे एकस्मिन् मन्त्रे सन्दर्भविशेषार्थे[४८] ब्राह्मणशब्दस्य प्रयोगो कृतो विद्यते। विन्टरनिज्महाभागेनापि यज्ञसम्बन्धीय-पारमार्थीय विद्याविषय-गद्यपद्यसंग्रहश्चेति उक्तं ब्राह्मणग्रन्थानां वैशिष्ट्यम्।[४९]

"ब्राह्मणो नाम कर्मणस्तन्मन्त्राणाञ्च व्याख्यानग्रन्थः" अर्थात् वैदिकमन्त्राणां व्याख्यास्वरूप-यज्ञक्रिया-निरूपकं शास्त्रं विद्यते ब्राह्मणग्रन्थम्। व्याख्यास्वरूपत्वादेव अस्य ब्राह्मणसाहित्यस्य विशालरूपं परिलक्षतेऽधुनास्माभिः। ब्राह्मणग्रन्थानां वर्ण्यविषयस्तु यज्ञस्यवास्तविकरूपस्य प्रतिपादनं, यज्ञानामभिप्रायस्य ज्ञापनं, यज्ञरहस्योद्घाटनेन यज्ञपरकव्यवस्थां युगन्तकारीकरणं च वर्तन्ते। तत्प्राचीनपारम्परिकभाषायामेते ब्राह्मणप्रतिपाद्यविषयाः विधि-अर्थवादद्वयेनाभिहिताः सन्ति। यज्ञानामानुसंगिकविवेचने समागतानामनेकानां विषयाणां समावेशेन कतिचित्पण्डिताः तान् दशविषयात्मकत्वेन कृतं व्याख्यां सर्वत्रैव परिलक्ष्यते। यत्र विनियोग-हेत्वर्थवाद-निर्वननाख्यानां च विवेचनं मुख्यरूपेणोपलभ्यते इति।

**आरण्यकम्-** ब्राह्मणग्रन्थादनन्तरं संरचितमारण्यकसाहित्यम्।विविधज्ञानविज्ञानस्य रहस्यात्मकविषयस्य[५०] साहित्यविशेषमारण्यकत्वेन ज्ञायते। "अरण्याध्ययनादेतदारण्यकमितीर्यते"[५१] इति सायणाचार्यस्य वचनानुसारेण अरण्येपाठ्यमानत्वात् आरण्यकमिति सार्थकमभिधानम्। महाभारतस्य आदिपर्वणि आरण्यकं वेदस्य सारत्वेन,[५२] अन्यत्रकुत्रचिदुपासनाकाण्डत्वेन[५३] चोपस्थापितमस्ति। वस्तुतः ब्राह्मणग्रन्थेषु प्रतिपादितानां विविधयाज्ञिकनियमानां दार्शनिक-धार्मिकव्यवस्था च विद्यते

अत: आरण्यकं "धार्मिक-दार्शनिकनिवन्धाभ्यां संपृक्त: प्रौढग्रन्थ:"[५४] इति उच्यते। इत्यत्र मुख्यरुपेणात्मतत्वस्य मीमांसा, प्राणविद्या: प्रतीकोपासना, दार्शनिकरहस्यात्मकव्याख्याश्च सन्ति। साहित्येऽस्मिन् विविधानां नित्यकर्मणां वर्णनं[५५] वर्णोच्चारणविधेर्वर्णनञ्च संप्राप्यते। अत: साहित्योऽयं ब्राह्मणवेदाङ्गयो: संयोजकरूपेणोपवर्ण्यते।[५६]

**उपनिषद्-** आध्यात्मिकज्ञानस्य चरमोत्कर्षमुपनिषत्साहित्ये एव प्राप्यते। अस्या उपनिषदोऽपि परिसर: विशाल:विस्तृतश्च। वेदान्तसारकारेण सदानन्देनोक्तम् "वेदान्तो नाम उपनिषत् प्रमाणम्"।[५७] उपनिषद् शब्दस्तु उप-नि इति उपसर्गपूर्वक-सद् धातो: क्विप् प्रत्यये कृते सति निष्पद्यते। अत: अस्य उपनिषद् इति पदस्यार्थो भवति तत्वज्ञानाय गुरो: पार्श्वे प्रवृत्तिकरणम्। शंकराचार्येणापि अविद्यानाशकदुखनिरोधक: ब्रह्मत्वप्राप्ते: साधक इति अर्थे अस्य शब्दस्य प्रयोग: कृत:।[५८] स एवास्य शब्दस्य अर्थं स्पष्टयन्नाह- "या श्रद्धाभक्तिपूर्वकमात्मज्ञानजागरणेन ब्रह्मविद्यां प्रापयति जन्ममरणदुखात् मुक्तिं प्रददाति जरादिरोगाणां प्रशमनं करोति तथा संसारस्य अज्ञानमविद्यां नाशयति सैवोपनिषद् संज्ञा इति"।[५९] उपनिषदि मूलत: ब्रह्मविद्यामात्मतत्वं सृष्टिरहस्यं परलोकतन्त्रं कार्यकारणवाद: जीवब्रह्मणो: ऐक्यं सृष्टेरहस्यादिविषयाश्च आलोचिता:।

**वैदिकसंहितादीनाम् शाखा-** वैदिककाले वेदाध्ययनं गुरुपरम्परायां ऋषिपरम्परायां वा आश्रितमासीत्। वेदानामध्यापकै: अध्येतृभिश्च वेदानामक्षुण्णतारक्षार्थं प्रयत्न: परिश्रमश्च कृत:, तथापि कालस्य कुटिलाया: गते: बहु परिवर्तनं जातम्। परिणामत: प्रत्येकवेदस्य गुरोर्नामाश्रित्य ऋषेर्नामाश्रित्य च भिन्ना: भिन्ना: संहिता संसृष्टा:। पुनश्च कतिपया: विलुप्ता:। एवमेव सम्प्रति चतसृषु संहितासु द्वादशसंख्यका: शाखा पूर्णरूपेणोपलभ्यन्ते।

**उपवेद-** वेदचतुष्टयस्य प्रतिपाद्यविषयाणां ऐहलौकिकव्यवहाररुपि-विज्ञानमुपवेदत्वेन परिगण्यते। वेदानां क्रमश: उपवेदा: सन्ति आयुर्वेद:, धनुर्वेद:, गान्धर्ववेद:, स्थापत्यवेदश्च।

ऋग्वेदस्योपवेद-आयुर्वेदस्य कर्ता धन्वन्तरिः तद्वत् यजुर्वेदस्योपवेदधनुर्वेदस्य विश्वामित्रः, सामवेदस्योपवेदगान्धर्ववेदस्य भरतमुनिः, अथर्ववेदस्योपवेद-स्थापत्यवेदस्य च विश्वकर्माऋषिर्विद्यते।

यद्यपि उपवेदानां मूलग्रन्थाः नोपलभ्यन्ते किन्तु तेषां ग्रन्थानां परवर्तिसमये संरचिताः भाष्यग्रन्थाः तु समुपलभ्यन्ते एव। यथा यजुर्वेदस्य अष्टांगहृदयः, चरकसंहिता, धनुर्वेदस्य समरङ्गणसूत्रधारः मुक्तिककल्पतरुः, गान्धर्ववेदस्य भरतनाट्यशास्त्रं संगीतदर्पणं, स्थापत्यवेदस्य शिल्पदीपिका वास्तुराजवल्लभश्चेति प्रसिद्धाः।

**वेदाङ्गानि**- "अंग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि" अर्थात् कस्यापि वस्तुनः सम्यग्ज्ञानाय येषामुपकरणानां प्रयोजनं भवति तेषाम् अंग इति संज्ञा विधीयते। वस्तुतः वेदः एकं दुरुहशास्त्रम्। अतः तस्य दुरूहस्य ज्ञानाय, कर्मकाण्डे तस्य प्रतिपादनाय च येषां शास्त्राणामावश्यकता भवति तान्येव शास्त्राणि वेदाङ्ग इत्यनेन ज्ञायन्ते। शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषश्चैतानि षट् वेदाङ्गानि। वर्णोच्चारणे उपकारकं अङ्गं शिक्षा, यज्ञादि कर्मकाण्डस्योपकारकं कल्पः, शब्दानां प्रकृति प्रत्ययानां ज्ञानाय व्याकरणं, वैदिकपदानां व्युत्पत्तिः तेषामर्थावगमनाय च निरुक्तं, मन्त्राणां पाठार्थं छन्दः पुनश्च यज्ञ-यागादि अनुष्ठानार्थं कालनिर्णेतुं ज्यौतिषशास्त्रस्य च ज्ञानमत्यावश्यकं विद्यते। एतेषां वेदाङ्गानां मूलग्रन्थास्तु सूत्रवद्धाः। शिक्षाशास्त्रं कल्पशास्त्रं च विहाय शेषभूतानि अंगानि वेदानुसारेण संहितानुसारेण वा नैव विभाजितानि।

कल्पशास्त्रं मूलतः सूत्ररूपं वर्तते, अतः शास्त्रमिदं सूत्रग्रन्थ इत्यनेनापि परिचीयते। सूत्रग्रन्थाः वैदिकसाहित्यस्य अन्तिमं सोपानमस्ति। यद्यपि सूत्रसाहित्यमित्यनेन सूत्राकारग्रन्थाः बोध्यन्ते तथापि तेषु सर्वप्राचीनं कल्पशास्त्रमेव वैदिकसूत्रग्रन्थानामन्तर्गतम्। वस्तुतः वेदे प्रतिपाद्यमानानि विस्तृतकर्मकाण्डानि सूत्रवद्धं कर्तुं कल्पशास्त्रं प्रणीतम्। कल्पशास्त्रे चतुः प्रकारकाः सूत्रग्रन्थाः समुपलभ्यन्ते- श्रौतसूत्रं धर्मसूत्रं गृह्यसूत्रं शुल्वसूत्रञ्चेति।

श्रुतिप्रतिपादितानां दर्शपौर्णमासादियज्ञानां विधानं श्रौतसूत्रे वर्णितम्। अत्र ब्राह्मणादिग्रन्थे वर्णितानां श्रौताग्नियज्ञानां क्रमबद्धवर्णनं समुपलभ्यते। धर्मसूत्रेषु धार्मिकनियमानि चतुर्णां वर्णानामाश्रमाणां च पूर्णतया निरुपणं विद्यते।अत्र लौकिक-पारलौकिक-सामाजिक-नैतिकक्रियाणां वा वर्णनं सुष्ठुरूपेण प्रतिपादितम्। त्रैवर्णिकैः ब्राह्मणक्षत्रीयवैश्यैः अवश्यानुष्ठेयानां यागानामनुष्ठानानां वा विस्तृतवर्णनं गृह्यसूत्रे समुपलभ्यते। अत्र गार्हस्थ्यजीवनविषयाणां धार्मिकविधीनां विधानं वर्णितमस्ति। शुल्वसूत्रे मापविषयकाः वेदीनिर्माणप्रकारबोधकाः विषयाः विद्यन्ते। इदं शास्त्रं रेखागणितस्य सर्वप्राचीनेतिहासस्य ज्ञानाय अत्यन्तमावश्यकं विद्यते।

**प्रातिशाख्यग्रन्था**: - वेदानां प्रतिशाखासम्बद्धानां मन्त्राणां स्वरूपसंरक्षणार्थं वैदिकर्षिभिः कृतं प्रातिशाख्यग्रन्थानां प्रणयनम्। ऋग्वेदप्रातिशाख्यग्रन्थस्य भाष्यारम्भे उवटेन प्रातिशाख्यस्य प्रयोजनमुक्तंयद् शिक्षाछन्दोव्याकरणेषु प्रतिपादितानि सामान्यलक्षणानि प्रातिशाख्यग्रन्थे शाखाविशेषस्य लक्षणानि प्रतिपादितानि। उक्तञ्च-

> शिक्षा-छन्दो-व्याकरणैः सामान्येनोक्तलक्षणम्
>
> तदेवमिह शाखायामिति शास्त्रप्रयोजनम्॥

अस्तु तावत् वेदाङ्गानां पूर्वापौर्व्यत्वेन संरचिताः इमे ग्रन्थाः सम्प्रति सम्पूर्णरूपेणोपलभ्यन्ते, किन्तु कतिपयाः प्रातिशाख्यग्रन्थाः सुप्रसिद्धाः। यथा- ऋक्प्रातिशाख्यं, तैत्तिरीयप्रातिशाख्यं, वाजसनेयी प्रातिशाख्यम्, चतुरध्यायिका, ऋकतन्त्रः, अथर्वप्रातिशाख्यञ्चेति।

एवं प्रकारेण इह वैदिकसाहित्यस्य सूक्ष्मपरिचयमुपस्थापितम्। अधुना प्रत्येकेषां संहिताग्रन्थानां विभाजनं प्रस्तूतीकृत्य श्रृङ्खलितरूपेण वैदिकसाहित्यस्य विस्तृतिः प्रदर्श्यते। अत्र प्रत्येकस्य वेदस्य मुख्याः एवमुपलब्धाः ग्रन्थविशेषाः समुद्धृताः ।

## १. ऋग्वेद:

क. ऋग्वेदस्योपवेद: आयुर्वेद:।

ख. ब्राह्मणग्रन्था: ऐतरेय, शांख्यायनश्च।

ग. आरण्यकग्रन्था: ऐतरेय,शांख्यायनश्च।

घ. उपनिषद् ग्रन्था: ऐतरेय, कौषितकी।

ङ. शाखा शाकल-वाष्कलादिप्रमुखा:।

च. प्रातिशाख्यग्रन्था: शौनकस्य ऋग्वेदप्रातिशाख्यम्।

छ. शिक्षाग्रन्थ: पाणिनीय शिक्षा।

ज. सूत्रग्रन्था:

| | |
|---|---|
| श्रौतसूत्रग्रन्था: | आश्वालायनं शांख्यायनञ्चेति। |
| गृह्यसूत्रग्रन्था: | ऐतरेय शांख्यायनञ्चेति। |
| धर्मसूत्रग्रन्थ: | वशिष्ठधर्मसूत्रम्। |
| शुल्वसूत्रग्रन्थ: | नोपलभ्यते। |

## २. शुक्लयजुर्वेद:

क. शुक्लयजुर्वेदस्योपवेद धनुर्वेद:।

ख. ब्राह्मणग्रन्थ: शतपथब्राह्मणम्।

ग. आरण्यकग्रन्थ: बृहदारण्यकम्।

घ. उपनिषद् ग्रन्था: ईशोपनिषद् बृहदारण्यकोपनिषच्च।

ङ. शाखा- काण्वी-वाजसनेयी वा माध्यन्दिनीयश्चेति।

च. प्रातिशाख्यग्रन्थ: तैत्तिरीयप्रातिशाख्यम्।

छ. शिक्षा ग्रन्थ: माध्यन्दिनीयशिक्षा।

ज. सूत्रग्रन्था:

श्रौतसूत्रग्रन्थ: कात्यायनश्रौतसूत्रम्।

गृह्यसूत्रग्रन्थ: पारस्करगृह्यसूत्रम्।

धर्मसूत्रग्रन्थ: शङ्खलिखितधर्मसूत्रम्।

शुल्वसूत्रग्रन्थ: कात्यायनशुल्वसूत्रम्।

**३. कृष्णयजुर्वेद:**

क. कृष्णयजुर्वेदस्योपवेद: धनुर्वेद:।

ख. ब्राह्मणग्रन्थ: तैत्तिरीय ब्राह्मणम्।

ग. आरण्यकग्रन्थ: तैत्तिरीयारण्यकम्।

घ. उपनिषद् ग्रन्था: तैत्तिरीयोपनिषद्, कठोपनिषद्-श्वेताश्वतरोपनिषद् च।

ङ. शाखा- तैत्तिरीय, मैत्रायणी काठक कपिष्ठलश्चेति।

च. प्रातिशाख्यग्रन्थ: तैत्तिरीयप्रातिशाख्यम्।

छ. शिक्षाग्रन्था: भारद्वाजशिक्षा वशिष्ठशिक्षा च।

ज. सूत्रग्रन्था:

श्रौतसूत्रग्रन्था: : बौधायनश्रौतसूत्रम्, आपस्तम्बश्रौतसूत्रम्, हिरण्यकेशीश्रौतसूत्रम्, वैखानसश्रौतसूत्रम्, मानवश्रौतसूत्रम्, भारद्वाजश्रौतसूत्रम्, वरुणश्रौतसूत्रश्चेति।

गृह्यसूत्रग्रन्था: : बौधायनगृह्यसूत्रम्, आपस्तम्बगृह्यसूत्रम्, हिरण्यकेशीगृह्यसूत्रम्, काठकगृह्यसूत्रम्, मानवगृह्यसूत्रम्, भारद्वाजगृह्यसूत्रञ्चेति।

धर्मसूत्रग्रन्था: : बौधायनधर्मसूत्रम्, आपस्तम्बधर्मसूत्रम्, हिरण्यकेशीधर्मसूत्रम्, वैखानसधर्मसूत्रम्, विष्णुधर्मसूत्रञ्चेति।

शुल्वसूत्रग्रन्था: : बौधायनशुल्वसूत्रम्,आपस्तम्बशुल्वसूत्रम्, हिरण्यकेशीशुल्वसूत्रम्,मानवशुल्वसूत्रञ्चेति।

**४. सामवेद:**

क. सामवेदस्योपवेद: गान्धर्ववेद:।

ख. ब्राह्मणग्रन्था: ताण्ड्यब्राह्मणं पञ्चविंशब्राह्मणं वा,षडविंशब्राह्मणं, छान्दोग्यब्राह्मणं, दैवतब्राह्मणं, सामविधानब्राह्मणम्, आर्षेयब्राह्मणं, वंशब्राह्मणं, जैमिनीयब्राह्मणञ्चेति।

ग. आरण्यकग्रन्थ: तवलकाराण्यक:।

घ. उपनिषद् ग्रन्था: केनोपनिषद्, छान्दोग्योपनिषद् च।

ङ. शाखा कौथुमीय राणायनीय जैमिनीयश्चेति।

च. प्रातिशाख्यग्रन्थ: ऋक्तन्त्रम्।

छ. शिक्षाग्रन्थाः ऋक्-तन्त्र शिक्षा, नारदीयशिक्षा।

ज. सूत्रग्रन्थाः

श्रौतसूत्रग्रन्थाः आर्षेयश्रौतसूत्रं, लाट्यायनश्रौतसूत्रं,
दाण्ड्यायनश्रौतसूत्रं, जैमिनीयश्रौतसूत्रञ्चेति।

गृह्यसूत्रग्रन्थाः दाण्ड्यायनगृह्यसूत्रं, जैमिनीयगृह्यसूत्रं,
गोभिलगृह्यसूत्रं, खदिरगृह्यसूत्रञ्चेति।

धर्मसूत्रग्रन्थः गौतमधर्मसूत्रम्।

शुल्वसूत्रग्रन्थः नोपलभ्यते।

**५. अथर्ववेदः**

क. अथर्ववेदस्योपवेदः स्थापत्यवेदः।

ख. ब्राह्मणग्रन्थः गोपथब्राह्मणम्।

ग. आरण्यकग्रन्थः नोपलभ्यते।

घ. उपनिषद् ग्रन्थाः मुण्डकोपनिषद्, माण्डुक्योपनिषद्, प्रश्नोपनिषद् च।

ङ. शाखा शौनक पैप्पलादादयः।

च. प्रातिशाख्यग्रन्थाः चतुरध्यायिका अथर्वप्रातिशाख्यश्चेति।

छ. शिक्षाग्रन्थः माण्डुकीशिक्षा।

ज. सूत्रग्रन्थाः

श्रौतसूत्रग्रन्थः वैतानश्रौतसूत्रम्।

गृह्यसूत्रग्रन्थः कौषिकगृह्यसूत्रम्।

धर्मसूत्रग्रन्थ:	पैठिनसीगृह्यसूत्रमिति क्वचिदुल्लिख्यते।

शुल्वसूत्रग्रन्थ:	नोपलभ्यते।

**लोकतन्त्रस्य परिभाषा**

मानवसमाजस्योत्थानोन्नतेर्गत्यां यदा राज्यव्यवस्थाया: विकास: संजात: तदा विविधप्रकारकाणां शासनव्यवस्थानाम् उद्भवो जात इति पाश्चात्य्-विपश्चितानामभिमतम्। राजशास्त्रं समाजशास्त्रस्यान्तर्भुक्तत्वात् तदपि एकं परिवर्तनशीलविज्ञानत्वेन ज्ञायते। अत: ता: नवविकशिता: सर्वा: शासनव्यवस्था: अपि परिवर्तनशीला:। यथा प्राचीनकाले एकनायकतन्त्रराजतन्त्रश्च सर्वोत्कृष्टत्वेन गण्येते स्म तदेव परवर्तिनिसमये सीमितराजतन्त्ररूपेण परिदृश्यते। जनतन्त्रमिति शासनव्यवस्थाया: अवस्थिति: प्राचीनग्रन्थेषु नोपलभ्यते इति अनेकानां पण्डितानां मतमस्माभि: श्रुतम्।[६०] किन्तु महाभारतम्-अर्थशास्त्र-शुक्रनीतिसार-प्रभृतिग्रन्थानामवस्थिति: एतदेव प्रमाणयति यदस्मदीयप्राच्यदेशेऽपि अस्य राजनैतिकशास्त्रस्याध्ययनस्य परम्परा प्राचीनकालादेव प्रचलिता आसन्निति। इतोऽपि वैदिकराजनीते: शोधपण्डितै: तत्कालीनराजनीते: सम्यक् व्याख्या स्व-स्व-लेखेषु शोधपुस्तकेषु चोपस्थापिता। तेषु विद्वत्सु सातवलेकर: रामानुजताताचार्य: कपिलदेद्विवेदी शिवाचार्य: प्रभृति: पण्डिता:[६१]"जानराज्यम्" इति शासनविधाया: वर्णनं लोकतन्त्रेण सह साधयितुं प्रयत्नरता: दरीदृश्यन्ते।

सम्प्रति लोकतन्त्रात्मिका शासनव्यवस्थैव सर्वजनसमादृता व्यवस्था विद्यते। यत्र सर्वसाधारणानां स्वतन्त्रता-स्वाधीनता-न्यायाधिकार-उचितजीवनमूल्यानाञ्च सम्यक् प्रकाश: परिदृश्यते। पद्धतिरियं वर्तमाने राजनैतिकक्षेत्रे सर्वजनसमादृतत्वात् बहुलप्रचारितत्वाद्वा विशेषगुरुत्वपूर्णा परिलक्ष्यते।

लोकतन्त्रस्य परिभाषाप्रदानात्पूर्वं परिभाषाया: संज्ञा वर्णनीया:। वैयाकरणा:

परिभाषाया; लक्षणमाहु:-

परितो व्यापृतां भाषां परिभाषां प्रचक्षते

परितो भाष्यते या सा परिभाषा प्रकीर्तिता।।[६२]

अर्थात् विविधशास्त्रस्य प्रवृत्तिनिवृत्तयो: नियामकं तत्वं परिभाषेति संज्ञते। परिभाषायामपि व्याप्ति-अव्याप्त्यातिव्याप्त्यादय: दोषा: समायान्ति। अत: तान् सर्वान् दोषान् विहाय या संज्ञा भवति सैव परिभाषा इति ज्ञेया। परिभाषा तु अपरिवर्तनीया। किन्तु राजशास्त्रस्य विषयत्वात् लोकतन्त्रमितितत्वं परिवर्तनशीलम्। अत: अस्य लोकतन्त्रस्य परिभाषापि विविधै: पण्डितै: विविधसमये भिन्न-भिन्न-रूपेण प्रदत्ता। अत्र कतिपय प्रमुखानां पण्डितानां परिभाषा[६३] उल्लिख्येतेऽत्र -

१. "Democracy is a poor system of government at best; the only thing that can honestly be said in its favor is that it is about eight times as good as any other method the human race has ever tried." Robert A. Heinlein

२. "Democracy, or democratic government, is "a system of government in which all the people of a state or polity ... are involved in making decisions about its affairs, typically by voting to elect representatives to a parliament or similar assembly," as defined by the Oxford English Dictionary.

३" a government in which the supreme power is vested in the people and exercised by them directly or indirectly through a system of representation usually involving periodically held free elections." Merriam-Webste.

उपर्युक्तासु लोकतन्त्रस्य परिभाषासु आब्राहमलिंकनस्य परिभाषा सर्वजनसमादृता

विद्यते। तस्यां परिभाषायां राजनैतिकसर्वोच्चाधिकार: प्रत्यक्षरूपेण जनान्प्रत्यर्पितास्ति। लोकतन्त्रस्याङ्गलशब्द: Democracy इति मूलरुपेण ग्रीकशब्द: democratia त: उत्पन्न:। democratia इत्यपि demos एवं krats शब्दद्वयस्य संयोगाज्जात:। अत: शव्दद्वयस्यार्थोऽस्ति क्रमश: जन एवं शक्ति। अत: democratia इत्यनेन "rule of the people" इति अर्थं व्यनक्ति।[६४]

परन्तु पाश्चात्यजगति यथा राजनैतिकज्ञानस्य प्रारम्भ: जात: तदनुसारमेतेषां परिभाषा: स्फुटीभूता:। फ्रान्सराज्यक्रान्तेरनन्तरमेव यूरोपखण्डे विविधानां चिन्तनानां समुद्रेक: जात:। तेषु राजनैतिकदर्शनेषु बेन्थम-स्टुअर्ट-एडमण्ड-बर्क्-मोर्ले-डेविड-ह्युम-मिल:-प्रभृतिभि: विद्वद्भि: समर्थित: उपयोगितावाद:, स्मिथ्-मालथस्-रिकार्ड-स्टुअर्टाभि: समर्थित: व्यक्तिवाद:, बेन्थमास्टिनाभ्यां समर्थित: एकसत्तावाद:, अफलातून-केन्ट-रूसो प्रभृतिभि: समर्थित: आदर्शवाद:, कार्लमार्स्कसस्य मार्क्सवाद:,हाब्सनस्य संघवाद:, मैकाइवर-लास्की-अस्टिनै: समर्थित: बहुलवाद:, मुसोलिनी इत्यस्य फैसीवाद:, हिटलरस्य नाजीवाद:, युरोपखण्डस्य मध्ययुगीनेतिहासे प्राप्त: सामन्तवाद:, प्रथमेन नेपोलियनेन तृतीयेन नेपोलियनेन च फ्रान्सप्रदेशे संस्थापित: साम्राज्यवादश्चेत्यादि-प्रभृतिनिदर्शनानि जातानि।[६५] तदनन्तरं डेमोक्रेसी नामधेयस्य अवरसिद्धान्तस्य सृजनस्य विषये राजनैतिकपण्डितानामैकमत्यं परिलक्ष्यते।[६६]

यद्यपि पुरातनकाले रोमसाम्राज्ये जना: नगरराज्यनामधेयं राजनैतिकतत्वं दृष्टवन्त: तथापि फ्रान्सराज्यक्रान्तेरनन्तरं यूरोपखण्डे एतेषां भृशं चर्चा जाता। तदनन्तरं तत्र विविधैतिहासिकोत्थानपतनमाश्रित्य अनुभवान् वर्तुलीकृत्य च तेषां सिद्धान्तानां संशोधनसंवर्धनादिकं विहितम्। अत: काले काले सर्वेषां शब्दानां परिभाषाया: परिवर्तनं दृश्यते।

संस्कृते Democracyइत्यस्य समानार्थकरूपेण लोकतन्त्र-गणतन्त्र-प्रजातन्त्र-जनतन्त्र-

प्रभृतिशब्दा: अपि परिदृश्यन्ते। एतेषु लोक-गण-प्रजा-जन-प्रभृतीनि पदानि प्रायश: समानार्थकानि परिलक्ष्यन्ते। वैदिकसंहितानां कोषग्रन्थानामभिधानानाञ्च अनुसरणपूर्वकमेतेषां पदानामर्थस्यान्वेषणार्थं किञ्चित् प्रयत्नं विधास्यतेऽत्र।

लोकशब्दस्यार्थसम्पर्के वाचस्पत्यमितिग्रन्थे[६७]"दीप्तौ लोकयती" इत्यर्थे लोकदर्शनार्थे च प्रयुज्यते। पुनश्च "लोकयति असौ लोक:" इति अर्थेऽपि प्रयुज्यतेऽयं शब्द:। अमरकोश[६८]-मेदिनीकोश[६९]-प्रभृतिकोषग्रन्थे जनशब्दस्य व्याख्याप्रसंगे शब्दस्यास्य पुनरावृत्ति: परिदृश्यते। वस्तुत: राष्ट्रमित्युक्ते भूखण्डादिभि: सह राष्ट्रस्थानां जनानां संसूचनं भवति[७०] तथैव लोकशब्देनापि न केवलं निर्जीवभूखण्डानां ज्योतिष्कानां वा उल्लेख: सूच्यते अपितु तत्रस्थानां प्राणिनां[७१] जनानां हि समुपबृंहणं ज्ञायते। संहितादिग्रन्थेष्वपि लोकशब्द: कुत्रचित् भू-भूव: स्वरादिलोकानां प्रयोगार्थे[७२] कुत्रचित् सृष्टेरुत्पत्तिस्थलमित्यर्थे[७३] पुनश्च कुत्रचित् मर्त्यलोक: पृथ्वीलोको वा इत्यर्थे[७४] प्रयुक्तो दृश्यते। सायणाचार्येण राष्ट्रस्थानां जनसाधारणानां द्योतनार्थे[७५] लोकशब्दस्य प्रयोगो विहित:।

गणशब्दस्तु समूहार्थे[७६] उत्कृष्टानां गण्यानां व्यक्तीनां समूहार्थे[७७] च प्रयुज्यते। प्राप्तं च श्रुतौ "गणानां त्वा गणपतिं"[७८] अर्थात् गणानां समूहानां पति: पालको वा इति गणपति:। यत्र सायण: "गणानां देवादिगणानां सम्बन्धिनं गणपतिं"[७९] पुनश्च महीधर: "गणरूपेण पालकं गणपतिम्"[८०] इति सूचयेते। अथर्वसंहितायां गणशब्द: देवगणद्योतनार्थे प्रयुक्तमस्ति।[८१] तत्र गणानां शौर्यवीर्यस्याधारे विद्गण:[८२],गण:[८३],महागणत्वेन[८४] विभाजनं परिदृश्यते। वस्तुत: गणशब्दस्तु समूहार्थक:। के.पि. जयसवालमहोदयेन तस्य "Hindu polity" इति शीर्षके ग्रन्थे बौद्धसम्प्रदायस्य धर्मग्रन्थानामुल्लेखपूर्वकं गणनार्थे परिसंख्यार्थे वा गणशब्दस्य प्रयोग: व्याख्यात:।[८५] तस्मिन्नेवाध्याये सामूहिकप्रशासनमित्यर्थे गणराज्यार्थे वा वर्णितोऽयं गणशब्द:। तेन जैनशास्त्रस्य "गणरायणि"[८६] पदस्योपस्थापनं कृत्वा गणशब्द: सामूहिकार्थे, संघार्थे वा वर्णितोऽस्ति। कौटिल्येनापि[८७] प्रजातान्त्रिकात्मिकानां संस्थानां संघमिति संज्ञा दत्ता।

शान्तिपर्वणि गण: परराष्ट्रनीते: राजकोषवृद्ध्यर्थं सैन्यशक्तिसंवर्धनार्थं सुष्ठुराजनैतिकनीतिप्रणयनार्थं च प्रसीद्धत्वेनोपवर्णितम्।[८८]M. Williams महोदयस्य संस्कृतांग्लाभिधाने गणशब्दमुपजाति (tribes) इत्यर्थे अनूदित:।[८९]

गणवत् जनशब्दोऽपि विशिष्टार्थवाहक:। वस्तुत: जातस्य व्यक्तिविशेषस्य ‘जन’इति संज्ञा न, तत्तु स्वात्मविकाशवलेन[९०] आध्यात्मिकशक्तिविकाशवलेन च स्वादर्शं साधयति चेत् तं जन इति संज्ञया सूचयितुं शक्यते।[९१] अत: ‘जनतन्त्र’इत्युक्ते विशिष्टानां व्यक्तीनां शिक्षितव्यक्तीनां वा तन्त्रमिति बुध्यते न तु गरिष्ठतन्त्रम्। संहिताग्रन्थेषु कुत्रचित् उत्पन्नार्थे,[९२] कुत्रचित् मनुष्यार्थे[९३] कुत्रचित् कर्तव्यपरायणव्यक्तीत्यर्थे[९४] पुन: कुत्रचिद्यजमानार्थे भक्तार्थे वा[९५] अन्यत्रकुत्रचिद्वा विविधानां भाषाणां ज्ञानि-व्यक्तिसमूहार्थे[९६] परहितकारिव्यक्तिसमूहार्थे[९७] च प्रयुक्तोऽयं गणशब्द:।

प्रजा इति प्रकृष्टजन्मा।[९८]यया स्वजीवनं प्रकृष्टोत्कृष्टं कृतं सा प्रजा। कोषग्रन्थेषु सर्वसाधारणजन:[९९] इत्यर्थे सन्ततिरपत्यार्थे[१००] वा शब्दस्यास्य प्रयोग: कृत:। श्रुत्यादिषु "प्रजाभ्य: पुष्टिं विभजन्त आसते"[१०१] इत्यनेन मन्त्रेण प्रजापालकानां गुणा: प्रगीता: सन्ति। अन्यत्र कुत्रचित् उत्कृष्टानां जनसाधारणानां द्योतनार्थे[१०२] सन्ततेरपत्यार्थे वा प्रयुक्तोऽयं शब्द:। अत्र सन्ततिप्रजाशब्दौ: समानार्थकत्वेनोपवर्णितौ। अत: वैदिकराजनीतौ शासकानां (राज्ञां) स्वप्रजा: प्रति पुत्रवत् व्यवहार: परिलक्ष्यते।[१०३] तत्र प्रजापतिं (प्रजानां पति: पालको वा) तं सर्वोच्चदेवतात्वेनोपस्थाप्यते इति।[१०४]

तन्त्र शब्द: "तनु विस्तारे" इति धातौ ष्ट्रन् प्रत्ययस्य प्रयोग: द्विधा: दृश्यते कर्तरि करणे च। यत् जनेषु व्यवस्थासु च तनोति इति तन्त्रम्। येन सर्वमस्तित्वं तन्यते (करणे) इति तन्त्रम्।[१०५] वाचस्पत्यमिति बृहत्-शब्दकोषग्रन्थे ग्रन्थकारेण तन्त्रशब्दस्योल्लेखपूर्वकं तस्य विंशतिसंख्यका: अर्था: प्रोक्ता:।[१०६] तेष्वर्थेषु तान्त्रिकोपासना तन्त्रशास्त्रादिकान् विषयान्

विहाय इह लोकतन्त्रस्य तन्त्रशब्देनसह समानार्थकानां पदानां व्याख्या क्रियते।

(क) सिद्धान्तार्थे- यस्य सिद्धान्तस्य सहाय्येन संञ्चालनस्य विस्तारणस्य[१०७] च व्यवस्था विधीयते तदेव तन्त्रम्।

(ख) हेत्वर्थे- कस्याश्चन व्यवस्थाया: हेतौ केचन नियमा: स्थिरीकृता: भवन्ति, ते नियमा: एव तन्त्रत्वेन ज्ञायन्ते। आश्वालयन श्रौतसूत्रेऽपि पूर्णार्थे (अंगसंहति इत्यर्थे) नियमार्थे च कृतस्य तन्त्रशब्दस्य प्रयोग:।[१०८]

(ग) इतिकर्तव्यतार्थे- किञ्चित् कर्मसम्पादनार्थं स्थिरीकृतानां नियमानां विशुद्धतया विचार्य: प्रयुक्ते सति कर्तव्यस्य पराकाष्ठा दृग्गोचरी भवति। सा एव इतिकर्तव्यता, तन्त्रं च।

(घ) राष्ट्रे- राष्ट्रसञ्चालनार्थं निर्धारितनियमानां कुञ्जिका अपि तन्त्रत्वेन ज्ञायन्ते।

(ङ) स्वराष्ट्रचिन्तायाम्- यथा शरीरे भिन्ने भिन्ने अंग-प्रत्यंगे स्थिते सत्यपि एकेन तन्त्रेण परिचालिता: भवन्ति तथैव राष्ट्रमपि स्वकीयं मत्वा राष्ट्रेण सह स्वीयाम् एकात्मतां स्थापयित्वा वा यजुर्वेदे लिखितं मन्त्रानुरुपं[१०९] स्वराष्ट्रसंञ्चालनव्यवस्थापि तन्त्रमित्युच्यते।

(च) प्रबन्धे- कस्यचनकर्मण: सुष्ठु सम्पादनार्थं निहितं प्रवन्धमपि तन्त्ररुपेणोल्लेखितम्।

(छ) वयनसाधने- वस्त्राणां वयनसमये वयनतन्त्रसञ्चालनार्थं स्थिरीकृता: नियमा: अपि तन्त्ररूपेण ज्ञायन्ते। प्राप्तं च मेदिनीकोषमिति नामके कोषग्रन्थे शब्दस्यास्य समार्थकानां शब्दानां सूची-

तन्त्रं कुटुम्वकृत्ये स्यात् सिद्धान्ते चौषधोत्तमे

प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे॥[११०]

एवमेव विविधेष्वर्थेषु तन्त्रपदस्य व्यवहार: अस्माभि: परिदृष्ट:। वस्तुत: तन्त्रपदं नियमार्थे

विधिप्रणयनार्थे वा विधीयते।

पूर्वालोचितानां लोक-गण-जन-प्रजादि पदानां कोष-निर्वचनादिग्रन्थानां परिशीलनानन्तरं एतदधिगम्यते यत् एते शब्दा: मनुष्यसूचका: वर्तन्ते। अपि च जनसाधारणादतिक्रम्य एकस्य देशविशेषस्य राष्ट्रविशेषस्य वा जनानपि (नागरिकाणामपि) संसूचनं दीयते। पुन: तन्त्रपदेन प्रशासनपद्धति: निर्दिश्यते। इत्यत्र षष्ठीतत्पुरुषत्वेन विचार्य लोकतन्त्रस्य परिभाषावत् जनानां प्रशासनं जनतन्त्रमिति निष्कर्षं निगदति।

इतोऽपि संहितासु जनसाधारणसूचनार्थं 'विश्'इति पदस्य प्रयोग: परिलक्ष्यते। विश् पदस्यार्थं दत्वा ब्राह्मणेनोक्तम्- "राष्ट्रानि वै विश:"[१११] तदनुगुणमेव निघण्टुरपि[११२] अस्य पदस्यार्थ: 'मनुष्य'इति करोति। संहितासु 'प्रजा'इति पदं सूचयितुं विश् इत्यस्य प्रयोगो दरीदृश्यते।[११३] एकस्मिन् स्थाने संगठनपुरस्सरं पादमग्रेसृतानां जनानां द्योतनार्थमपि विश् शब्दस्य प्रयोग: प्राप्यते।[११४] निरुक्तकारेण "यत्पाञ्चजन्यया विशा:"[११५] इत्यनेन वाक्यांशेन पञ्चसंख्यकानां ब्राह्मण-क्षत्रिय-वैश्य-शूद्र-निषादादीनां[११६] विविधतां जाति-जनजातीनां सामूहिकरुपं विश: इत्यनेन बोधितमिति। "पञ्च पृक्ता संख्या, स्त्रीपुंनपुंसकेष्वविशिष्टा"[११७] इत्यनेन पुन: तेषु पञ्चसंख्यकेषु जाति-जनजातिषु स्त्रीणामपि ग्रहणं वर्णितम्। पुनश्च दास-दस्यु प्रभृति जनसमूहद्योतनार्थं विशपदस्य प्रयोग: ऋक्संहितायामुपलब्धम्।[११८] अत: निष्कर्षरुपेण वक्तुं शक्यते यत् वैदिकजनसाधारणसूचकेन विश् पदेन जाति-धर्म-वर्णादि प्रभेदान् परिहारपूर्वकं सर्वेषां जनगणानां ग्रहणं भवतीति।

## वैदिकलोकतन्त्रस्य सामान्यवैशिष्ट्यानि

१. यद्यपि लोकतन्त्रमितिपदं संहिताग्रन्थेषु नैव प्रत्यक्षत: लभ्यते तथापि साम्प्रतिक लोकतान्त्रिकवैशिष्ट्येन युक्तस्य शासनव्यवस्थात्वेन शुक्लयजुर्वेदोपदिष्टस्य जानराज्यस्योल्लेख:[११९] प्राप्यते। यत्र साम्राज्य[१२०]-स्वराज्य[१२१]-पारमेष्ठ्य-राज्यादीनां[१२२]

व्यवस्थामतिक्रम्य जनसमर्थनपूर्वकं स्वशासकस्य निर्वाचनं[१२३] विहितम्। यत्र स: शासक: जनप्रतिनिधित्वेन तस्य परिचयं प्रदास्यति।[१२४] तद्व्यवस्थायां शासका: शासितानां सामाजिक-आर्थिक-शैक्षिकोन्नते: बद्धपरिकरा:[१२५] दृश्यन्ते। अत्र अस्या: व्यवस्थाया: कानिचित् सामान्यलक्षणानि उपस्थाप्यन्ते।लोकतन्त्रमेकं शासनविधिर्विद्यते, यत्र राष्ट्रस्था: जना: प्रत्यक्षरूपेण प्रतिनिधिप्रेरणेन वा शासनकार्यस्य सञ्चालनं कुर्वन्तीति।[१२६]

२. कस्मिन्नपि ह्येकस्मिन् राज्ये निवसन्त: सर्वसाधारणजना: राजनैतिकशक्तेर्मूलत्वेन सर्वोत्कृष्टतत्वरूपेण च परिगण्यन्ते। ते राज्ञ: राज्यस्य वाङ्गानि सन्तीति वर्णितम्।[१२७]

३. लोकतन्त्र: जनानां व्यक्तिसमूहानां सामग्रिक-उन्नतेर्निमित्तं प्रगतेर्निमित्तं च परमोपकारिणो भवन्ति। राष्ट्रस्य जन्म एव जनकल्याणसाधननिमित्तम्।[१२८] राष्ट्रसंरक्षणार्थं च राज्यव्यवस्थेति वर्णितम्।[१२९]

४. शासितानां सर्वेषां जनानां स्वाभिमतप्रदानस्य व्यवस्थापि प्रदास्यतेऽत्र।[१३०]

**लोकतन्त्रमितितत्वस्यान्वेषणस्य परिसर:**

वैदिकलोकतन्त्रस्याध्ययनात्पूर्वं लोकतन्त्रस्य अध्ययनपरिसर: अवश्यं विवेचनीय:। यद्यपि वैदिकसंहितासु अस्य तत्वस्य साक्षात् वर्णनं नोपलभ्यते तथापि परोक्षवादिवेदे[१३१] परोक्षरूपेणैव अस्य तत्वस्यावस्थिति: प्रगतिश्च व्याख्यातोऽस्ति। यथा वैदिकसंहितायां प्रारब्धमन्त्रे[१३२] प्रयुक्त: अग्निशब्द: "अग्रणिर्भवति इति अग्नि:"[१३३] अनेन निर्वचनेन अग्निपदं बहूनां प्रजानां अग्रे स्थित: प्रतिनिधिरूपो व्यक्तिविशेष इति अर्थं प्रकटीकरोति। तद्वत् “सहस्रशीर्षा”[१३४] प्रभृति मन्त्रेषु प्रयुक्तस्य सहस्रशब्दस्य व्याख्यापि कौटिल्येन[१३५] जनप्रतिनिधिरूपाणां मन्त्रिपरिषदां कृते प्रयुक्तम्। एवमेव लोक-गण-सभा-समिति-तन्त्र-सत्र-पञ्चजन-स्वराट्-विराट् प्रभृति: शब्दा: गूढार्थका:।

वैदिकसंहितासु प्राप्तं देवताविषयकं वर्णनं वस्तुत: एकस्य समाजस्य जनप्रतिनिधि-शासकसूचको वा वर्तते। शासकव्यक्तिविशेषं- राजापदेन सम्बोधनत्वात् राजतन्त्रस्य अवस्थितिरेवासीदिति परिकल्पनं सर्वथा अशुद्धम्। राजाशब्दस्तु दीप्तार्थकाद्राज्-धातो: कन् प्रत्ययेनान्तस्योपधायां दीर्घे न लोपे स्वादिकार्ये च निष्पन्नम्।[१३६] यास्काचार्य: अपि "राजते इति राजा"[१३७] अस्य निर्वचनस्योल्लेखं कृत्वा राजते दीप्यते प्रजावर्गे क्रियया यशसा चेति राजशव्दस्य व्युत्पत्तिगतार्थं निगदितम्। अत: वैदिकवाङ्मये प्राप्तं राजा इति पदं जनप्रतिनिधिसूचकं वर्तते।

वैदिकलोकतन्त्रस्य स्वरूपवर्णनं, ग्राम्यशासनादारभ्य राज्य-राष्ट्रान्ताराष्ट्रियपर्यन्तस्य च शासने स्वाधीनता-अधिकार-कर्तव्य-मानवीयमूल्यानाञ्च सम्यक् प्रकाशं, राष्ट्रसञ्चालनार्थं संविधानस्य व्यवस्थाया: प्रणयनं, निर्वाचनं व्यवस्थाया: विकाशं, दण्डविधानं, वैदेशिकनीतिं च वैदिकलोकतान्त्रिकप्रशासनस्य परिसरे समायान्ति। इतोऽपि स्वराज्यशासनव्यवस्थाया: विकाश: एवं तस्य समान्तरालरूपेण विकशितानां वैराज्य जानराज्यादीनां च व्याख्या अपि वैदिकलोकतन्त्रस्य वर्ण्य: विषय:। लकतन्त्रस्य पाश्चात्यचिन्तादपि उच्चतरां चिन्तनधारां समुपलभ्यतेऽत्र। वर्तमानस्य राजनीते: लोकतन्त्रस्य प्रत्याह्वानस्वरूपाणां तत्वानामुल्लेखपूर्वकं तद्वैदिकधर्मपरकनीतिनामवलम्बनेन तेषां समस्यानां समाधानस्य सूत्रनिर्णयमपि अस्य अध्ययनस्य परिसरादन्तर्गतोऽस्ति।

**शोधकार्यस्योद्देश्यम्-**

वैदिकसंहितानां सामान्य-अध्ययनेन तत्रस्थानां राजनीतिसूचकानां तत्वानां पर्यवेक्षणं मया अवलोकितम्। तत्र वर्णाश्रमव्यवस्था-शिक्षा-अर्थशास्त्रादीनां विविधविज्ञानानां वर्णनवत् राजनीतिक्षेत्रेऽपि परिवार-समाज-राज्य-राष्ट्रादीनामुत्पत्ति: प्रगतिश्च वर्ण्यते। सभा-समिति-परिषदादीनां विकाशस्य समान्तरालरूपेण साम्राज्य-वैराज्यादय: अनेकानां शासितराज्याणां

विकाश: सञ्जात:। अत: अस्माभि: चिन्तितं यत् वर्तमानप्रचलितायां लोकतन्त्रव्यवस्थायां स्थितान् विषयान् स्पष्टीकर्तुं राज्य-स्वराज्य-पारमेष्ठ्यराज्य-वैराज्यस्याध्ययनं भृशमुपादेयं भवति। एतत्सर्वं नूतनदृष्ट्या श्रीपाददामोदरसातवलेकरेण स्वस्य "मातृभूमि और स्वराज्यशासन" इति शीर्षके ग्रन्थे, के.पि.जयसवालेन “Hindu polity” इति शीर्षके ग्रन्थे, ए.एस.अलतेकरेण तस्य "State and Government in Ancient India" इति शीर्षके ग्रन्थे, सत्यकेतु विद्यालंकारेण "प्राचीन भारत की शासन पद्धति और राजशास्त्र" इति शीर्षके ग्रन्थे, बलबीराचार्येण तस्य "ऋग्वेदीय ब्राह्मणों का सांस्कृतिक अध्ययन", “ब्राह्मण ग्रन्थों के राजनीतिक सिद्धान्त” चेति शीर्षके ग्रन्थे च भृशं चर्चिता:। ताभ्य: चर्चाभ्य: अस्माकं धारणा समागता यत् वैदिकसंहिताभ्य: लोकतन्त्रस्य चिन्तनं कथं कर्तुं शक्यते इति विचार्य एतदध्ययनं सञ्चालितम्। एतस्य शोधकार्यस्योद्देश्यम् अधोलिखितानुगुणं वर्तते-

क. अपौरुषेयस्य वेदस्य विभिन्नेषु विषयेषु व्याख्यानशक्ते: प्रकटीकरणं विविधै: गवेषकै: विहितम्। अत: लोकतन्त्रस्य क्षेत्रेऽपि वैदिकर्षीणां भूमिकां व्याख्यातुं एष: विषय: निर्वाचित:।

ख. वैदिकचिन्तने आधुनिकमतानां चिन्तनानामपि अस्तित्वं विद्यत इति प्रमाणीकर्तुम्।

ग. विश्वसाहित्यस्य आदिमकृतिस्वरूपस्य वैदिकसाहित्यस्य विषयस्तु साम्प्रतिक-युगानुकूलं भवितुं शक्नोति वेति या शंका सर्वत्र दरीदृश्यते तां धारणां निराकृत्य वैदिकसंहिताया: सामर्थ्यस्य प्रस्तुतिरपि अन्यतममुद्देश्यम्।

घ. पाश्चात्यराजनैतिकचिन्तने परिदृश्यमानानां सन्देहतत्वानां दूरीकरणार्थं वैदिकसमाधानमन्वेषणमेतस्य शोधस्योद्देश्यम्।

ङ. बहव: विद्वांस: विविधानां समस्यानां समाधाननिमित्तं वैदिकचिन्तनस्य सूत्राणि समुद्धृत्य प्रस्तुवन्ति। तेषु विवेकानन्द-दयानन्द-अरविन्दादय अस्माभि: लब्धा:। अत: शोधप्रविधि-

अनुसरणपूर्वकं संकल्पिते विषये अनुसन्धातुं संहितानां ग्रहणं कृतम्।

एवमेव 'प्रस्तावना' इति शीर्षके प्रथमाध्याये वैदिकसाहित्यस्य परिचयः, लोकतन्त्रमिति पदस्य परिभाषा, तस्य सामान्यानां वैशिष्ट्यानामुद्धृतिपूर्वकं परिसरनिर्णयं च अस्याध्यायस्य वर्ण्यविषयाः वर्तन्ते। इह सर्वप्रथमं विशालस्य वैदिकसाहित्यस्य स्पष्टं चित्रं प्रस्तुतम्। तदनन्तरं वर्तमानराजनीतेः सर्वजनसमादृतस्य लोकतान्त्रिकप्रशासनस्य विविधानां समता-स्वाधीनतादि-अवधारणानां अवस्थानं वेदादिशास्त्रे उपलभ्यन्ते इति प्रमाणयितुं वेदमन्त्राणामनुसरणपूर्वकं लोकतन्त्रमिति पदस्य शाब्दिकार्थं व्याख्यातम्।

Democracy इत्यनेन जनान् तन्त्रं, जनात् तन्त्रं, जनस्य तन्त्रमितिनिर्वचनेन राजनैतिकाधिकारप्रदानेन जनैः सञ्चालितशासनप्रकाररूपं व्याख्यातम्। वैदिकमन्त्रे जनतान्त्रिकशासनस्यावस्थितिः जानराज्यमिति शासनप्रकारे स्वराज्यमिति शासनप्रकारे च प्रत्यक्षरूपेण परिलक्ष्यते। जनतायाः हितार्थं यद्राज्यं तत् जानराज्यमिति व्याख्यया लिङ्कनस्य परिभाषावत् सप्तष्वेव विभक्तिषु जानराज्यस्य व्याख्या उपस्थापिता। इतोपि जनतन्त्रस्य समार्थकशब्दरूपेण लोकतन्त्र-प्रजातन्त्र-गणतन्त्र-प्रभृतिपदानां कोषाणां वैदिकमन्त्राणां चानुसरणपूर्वकं जनतन्त्रात्मकं व्याख्यानंप्रस्तुतम्। अतः निष्कर्षरूपेण वक्तुं शक्यते यत् वैदिकमन्त्रे Democracy इति पदस्य साक्षादवस्थितेरभावः परिलक्षिते सत्यपि तद्भावगत-गणतन्त्र-लोकतन्त्र-जनतन्त्रादिपदानां व्याख्यां प्रस्तूय लोकतान्त्रिकप्रशासनस्य बीजं संहितासूपलब्धमितिप्रमाणयितुंशक्यते।